पिल्लका, स्त्री, ( पिल्लेन क्लेदयुक्तचक्षुषा कायतीति । कै+कः । टाप् । ) हस्तिनी । इति शब्दमाला ॥

पिव, इ सेचने । इति कविकल्पद्रुमः ॥ ( भ्वां-परं-सकं-सेट् । ) इ, पिन्वते । इति दुर्गादासः ॥

पिश, श प अवयवे । इति कविकल्पद्रुमः ॥ ( तुदां-मुचां-परं अकं-सेट् । ) श प, पिंशति पटः अवयवी स्यादित्यर्थः । इति दुर्गादासः ॥

पिशङ्गः, पुं, ( पिंशतीति । पिश+"पिशादिभ्यः कित् ।" उणां ।१।१२०। इत्यङ्गच् स च कित् । ) पिङ्गलवर्णः । तद्वति, त्रि । इत्यमरः । १ । ५ । १६—१७ ॥ ( यथा, ऋग्वेदे । १ । ८८ । २ । "तेऽरुणेभिर्वरमा पिशङ्गैः शुभे कं यान्ति रथतूर्भिरश्वैः ॥"

यथा च माघे । १ । ६ ।

"पिशङ्गमौञ्जीयुजमर्ज्जुनच्छविं
वसानमेणाजिनमञ्जनद्युति ।
सुवर्णसूत्राकलिताधराम्बरां
विडम्बयन्तं शितिवाससस्तनुम् ॥"

नागभेदः । यथा, महाभारते । १ । ५७ । १६ ।
"भैरवो मुण्डवेदाङ्गः पिशङ्गश्चोद्रपारकः ॥" )

पिशाचः, पुं, (पिशितं मांसमश्नातीति । पिशित+अश+"कर्म्मण्यण् ।" ३ । २ । १ । इति अण् । ततः "पृषोदरादीनि यथोपदिष्टम् ।" ६ । ३ । १०९ । इति शितभागस्य लोपः अशभागस्य शाचादेशः । ) देवयोनिविशेषः । इत्यमरः । १ । १ । ११ ॥ पिचाश इति भाषा ॥ ( यथा, मनौ । १ । ३७ ।
"यक्षरक्षःपिशाचांश्च गन्धर्व्वाप्सरसोऽसुरान् ॥"
"यक्षो वैश्रवणस्तदनुचराश्च । रक्षांसि रावणादीनि । पिशाचास्तेभ्योऽपकृष्टा अशुचिमरुदेशनिवासिनः ।" इति तट्टीकायां कुल्लूकभट्टः ॥ )
तस्य लोको यथा,—
"अन्तरीक्षचरा ये च भूतप्रेतपिशाचकाः ।
वर्जयित्वा रुद्रगणांस्ते तत्रैव चरन्ति हि ॥
नोर्द्ध्वं विक्रमणे शक्तिस्तेषां सम्भूतपाप्मनाम् ।
अत ऊर्द्ध्वं हि विप्रेन्द्र ! राक्षसा ये कृतैनसः ।
ते तु सूर्य्यादधः सर्व्वे विहरन्त्यूर्द्ध्ववर्जिताः ॥"
इति पाद्मे स्वर्गखण्डे १५ अध्यायः ॥
प्रेतः । यथा, शुद्धितत्त्वे ।
"अशौचान्ताद्द्वितीयेऽह्नि यस्य नोत्सृज्यते वृषः ।
पिशाचत्वं भवेत्तस्य दत्तैः श्राद्धशतैरपि ॥"

पिशाचकी, [ न् ] पुं, ( पिशाचाः सन्त्यस्येति । "वातातीसाराभ्यां कुक् च ।" ५ । २ । १२९ । इत्यत्र "पिशाचाच्च ।" इति वार्त्तिकोक्त्या इनिः कुक् च । ) कुवेरः । इति हेमचन्द्रः ।२।१०३॥

पिशाचद्रुः, पुं, (पिशाचानां द्रुः पिशाचप्रियो द्रुर्वा निविडत्वादन्धकारवत्त्वादशुचिस्थानजातत्वाच्च ।) शाखोटवृक्षः । इति त्रिकाण्डशेषः ॥ (शाखोटशब्देऽस्य विवृतिर्ज्ञातव्या ॥)

पिशाचवृक्षः, पुं, (पिशाचानां वृक्षः पिशाचप्रियो वृक्षो वा । ) शाखोटवृक्षः । इति रत्नमाला ॥

पिशाचसभं, क्ली, पिशाचानां सभा । इति नपुंसकलिङ्गसंग्रहटीकायां भरतः ॥

पिशाची, स्त्री, ( पिशाच+ङीष् । ) पिशाचिका । स्त्री पिशाची । इति शब्दमाला ॥ ( पिशाचवद्गन्धोऽस्त्यस्या इति । अच् ततो ङीष् । तद्वद्गन्धयुक्तत्वात् तथात्वम् । ) गन्धमांसी । इति राजनिर्घण्टः ॥

पिशितं, क्ली, ( पिंशति अवयवीभवतीति । पिश+"पिशेः किच्च ।" उणां । ३ । ९५ । इति इतन् स च कित् । यद्वा, पिश्यते स्मेति । क्तः । ) मांसम् । इत्यमरः । २ । ६ । ६३ ॥ ( यथा, मार्कण्डेयपुराणे । २५ । १७ ।
"हासोऽस्थिसन्दर्शनमक्षियुग्ममत्युज्ज्वलं तज्जनमङ्गनायाः ।
कुचादि पीनं पिशितं घनं तत्
स्थानं रतेः किं नरकं न योषित् ॥" )

पिशिता, स्त्री, ( पिशितवद्गन्धोऽस्त्यस्या इति । अच् ततष्टाप् । ) जटामांसी । इति मेदिनी । ते, ३३ ॥

पिशिताशी, [ न् ] त्रि, ( पिशितं अश्नातीति । अश्+णिनिः ।) शाष्कुलः । मांसभक्षकः । इति हेमचन्द्रः । ३ । ६३ ॥ ( यथा, महाभारते । १ । ८४ । १४ ।
"सङ्कीर्णाचारधर्म्मेषु प्रतिलोमचरेषु च ।
पिशिताशिषु चान्त्येषु मूढ़ ! राजा भविष्यसि ॥" )

पिशी, स्त्री, (पिंशतीति । पिश+कः । गौरादित्वात् ङीष् ।) जटामांसी । इति राजनिर्घण्टः ॥ ( जटामांसीशब्देऽस्या गुणादयो ज्ञातव्याः ॥ )

पिशुनं, क्ली, ( पिंशतीति । पिश+"क्षुधिपिशिमिथः कित् ।" उणां ३ । ५५ । इति उनन् । स च कित् । ) कुङ्कुमम् । इत्यमरः । २ । ६ । १२४ ॥ (पर्य्यायोऽस्य यथा,—
"कुङ्कुमं घुसृणं रक्तं काश्मीरं पीतकं वरम् ।
सङ्कोचं पिशुनं धीरं वाह्लीकं शोणिताभिधम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ )

पिशुनः, पुं, ( पिश+उनन् । स च कित् । ) कपिवक्त्रः । नारदः । काकः । इति मेदिनी । ने, ८२॥ (अङ्गष्वत्रः पुत्रः । यथा, मार्कण्डेये । ५१ । ६५ ।
"अङ्गध्रुक् तनयं लेभे पिशुनं नाम नामतः ॥"
कौशिकस्य पुत्रभेदः । यथा, हरिवंशे ।२१।५-६।
"वाग्दुष्टः क्रोधनो हिंस्रः पिशुनः कविरेव च ।
खसृमः पितृवर्त्ती च नामभिः कर्म्मभिस्तथा ॥
कौशिकस्य सुतास्तात ! शिष्या गार्ग्यस्य भारत ! ।
पितर्य्युपरते सर्व्वे व्रतवन्तस्तदाभवन् ॥" )

पिशुनः, त्रि, ( पिश+उनन् । स च कित् । ) अप्रकाशेनानुचितप्रबोधकः । परस्परभेदशीलः । इत्यमरटीकायां भरतः ॥ तत्पर्य्यायः ।
"द्विजिह्वः सूचकः कर्णेजपः पिशुन इत्यपि ।
दुर्जनो दुर्व्विधो विश्वकद्रुश्च पिशुनः खलः ॥"
इति जटाधरः ॥ * ॥
"कर्णेजपः सूचकः स्यादनौचित्यप्रबोधके ।
परस्परं भेदशीले पिशुनो दुर्जनः खलः ॥"
इति शब्दरत्नावली ॥
( यथा, आर्य्यासप्तशत्याम् । ५८ ।
"अनुग्रहेण न तथा व्यथयति कटुकूजितैर्यथा पिशुनः ।
रुधिरादानादधिकं दुनोति कर्णे क्वणन् मशकः ॥" )
क्रूरः । इति मेदिनी । ने, ८२ ॥ ( यथा, मनौ । ३ । १६१ ।
"भ्रामरी गण्डमाली च श्वित्र्यथो पिशुनस्तथा ॥")

पिशुना, स्त्री, ( पिशुन+टाप् । ) पृक्का । इति मेदिनी । ने, ८२ ॥ पिङ्गिशाक इति भाषा ॥ (पृक्काशब्देऽस्या गुणादयो ज्ञातव्याः ॥ )

पिष, ध औ ऌ चूर्णने । इति कविकल्पद्रुमः ॥ ( रुधां-परं-सकं-अनिट् । ) ध, पिनष्टि लोको गोधूमम् । औ, पेष्टा । ऌ, अपिषत् । इति दुर्गादासः ॥

पिष्टं, क्ली, ( पिष्यते स्मेति । पिष+क्तः । ) सीसकम् । इति रत्नमाला ॥ पिष्टकः । यथा,—
"अन्नादष्टगुणं पिष्टं पिष्टादष्टगुणं पयः ।
पयसोऽष्टगुणं मांसं मांसादष्टगुणं घृतम् ।
घृतादष्टगुणं तैलं मर्द्दनान्न च भक्षणात् ॥"*॥
अस्य गुणाः ।
"पिष्टं प्राणकरं रूक्षं विदाहि गुरु दुर्ज्जरम् ॥
शालिपिष्टमया भक्ष्याः कफपित्तविनाशनाः ।
वैदला गुरवो भक्ष्या विष्टम्भिष्टमारुताः ॥
सगुड़ाः सतिलाश्चैव सक्षौद्रक्षारशर्कराः ।
भक्ष्या बल्याश्च हृद्याश्च गुरवो बृंहणाः परम् ॥
सस्नेहाः स्नेहसिक्ताश्च भक्ष्या गोधूमसम्भवाः ।
गुरवस्तर्पणा हृद्या बलोपचयवर्द्धनाः ॥
मर्द्दिता समिता क्षीरनारिकेलघृतादिभिः ।
अवगाह्य घृते पक्का घृतपूरोऽयमुच्यते ॥
घृतपूरो गुरुर्वृष्यः कफकृद्रक्तमांसदः ।
रक्तपित्तहरो हृद्यः स्वादुः पित्तहरोऽग्निदः ॥"
गोधूमचूर्णं समिता ।
"समिता मधुदुग्धेन खण्डैलामरिचादिभिः ।
घृते पक्का क्षिपेत् खण्डे संयावो बृंहणो गुरुः ॥
समिता वेष्टिता मध्ये मधु दत्त्वा घृते कृता ।
मधुमस्तकसंदिष्टं तद्दृष्यं गुरु दुर्जरम् ॥"
इति राजवल्लभः ॥
पर्पटशष्कुलीफेनकवटलड्डुकानां गुणास्तत्तच्छब्दे द्रष्टव्याः ॥ * ॥ चूर्णीकृते, त्रि ॥ (यथा, कथासरित्सागरे । ६ । ४१ ।
"कृत्वा तांश्चणकान् पिष्टान् गृहीत्वा जलकुम्भिकाम् ।
अतिष्ठं चत्वरे गत्वा छायायां नगराद्बहिः ॥")

पिष्टकं, क्ली, (पिष्टमिव प्रतिकृतिः । इवार्थे कन् ।) तिलचूर्णम् । इति राजनिर्घण्टः ॥

पिष्टकः, पुं, ( पिष्टानां विकार इति । "संज्ञायाम् ।" ४ । ३ । १४७ । इति कन् । ) पिष्टानां तण्डुलादीनां विकारः । पिठा इति भाषा ॥